नाट्यशास्त्रस्य प्रणेता कः, कदा चेयं रचना प्रस्तुतेति सम्यग् विवेचनीया।

अथवा,

नाट्यशास्त्रस्योत्पत्तिनिर्मितिसम्प्राप्तीनां नाट्यशास्त्रानुसारं विवरणं प्रस्तुत।

उत्तरम् - प्रस्तुतोऽयं प्रश्नः समीक्षात्मकः ऐतिहासिकश्च। आप्राचीनकालात् नाट्यशास्त्रस्य निर्विवादात्मको रचयिता प्रणेता वा आचार्यो भरतमुनिः। इत्यपि वर्त्तते यत् तस्याप्युपदेष्टारौ पितामहमहेश्वरावास्ताम्। नास्त्यत्र विसंवादावसरः भरतो मुनिर्न केवलं लोकप्रसिद्धत्वात् एवापि तु पुराणेष्वपि कीर्तितत्वात् पौराणिकः। अत्रायमभिप्रायः देवलोकात् भूतलपर्यन्तं तस्य विमला ख्यातिरस्ति। पुराणादिषु इतिहासप्रसिद्धा अनेके 'भरत' इति नामधेयाः सन्ति। तेषु दशरथपुत्रो भरतः, दुष्यन्तपुत्रो भरतः (अभिज्ञानशाकुन्तलनाटके चर्चितः) मान्धातापौत्रो भरतः जडभरतश्च। इमेते भरताः राजसम्बद्धाः सन्ति, अतो तेषु कोऽप्येको भरतो नाट्यशास्त्रप्रणेता भवितुं नार्हति। पुराणेषु चर्चितत्वात् भरतमुनिरयमैतिहासिकपृष्ठभूमौ समायाति।

अत्रायं निष्कर्षः - नाट्यशास्त्रस्य प्रणेतारं भरतमुनिं ऐतिहासिकमहापुरुषरूपेण स्वीकर्तव्यः। अयन्तु निर्विवादोऽस्ति यत् - मुनिना भरतेन ब्रह्मणः सकाशात् नाट्यवेदस्योपलब्धिः कृताः। अनन्तरं सः स्वपुत्रेभ्यः शिष्येभ्यश्चाध्यापयामास। तेष्वनेकैः नाट्यशास्त्रविषयका ग्रन्थाः निर्मिताः। आचार्येण भरतमुनिनाऽपि काले काले 'महेन्द्रविजयनाटकस्य, त्रिपुरदाहडिमस्य, अमृतमन्थनसमवकारस्य च अभिनयप्रयोगैः संरचना प्रस्तुतीकृता; प्रेक्षागृहस्य रचनायामेव श्रेयस्त्वं भजते। नाट्यमण्डपस्याद्यप्रवर्तकोऽपि भरतमुनिः एव समादरणीयः।

अपरञ्च नाट्यशास्त्रस्य परवर्त्तिभिः ग्रन्थैः नाटकादीनां साक्ष्यैश्चापि नाट्यप्रणेतुः नाट्यशास्त्रस्य विरचने च भरतमुनेरेवोल्लेखो मिलति। नाट्यशास्त्रीय रचनासु - यथा धनञ्जयस्य दशरूपके, नन्दिकेश्वरस्याभिनयदर्पणे, शारदातनयस्य भावप्रकाशने, अभिनवगुप्तविरचितायां नाट्यशास्त्रस्याभिनवभारतीटीकायां, सिंहभूपालस्य रसार्णवसुधाकरे, सागरनन्दिनो नाटकलक्षणरत्नकोशे च श्रद्धापुरस्सरं नाट्याचार्यरूपेण स्मृताः एते।

एवञ्च महर्षेः पाणिनेः सूत्रात्मिका अष्टाध्यायी विद्वत्समाजे विद्योतते तथैव नाट्यविद्यायाः सूत्रकाररूपेण प्रसिद्धोऽयं भरतो मुनिः। एभिः साक्ष्यप्रमाणैः भरतमुनिरेव नाट्यशास्त्रस्य रचयिता प्रणेता वेति सुनिश्चितः। तथा चाभिनवगुप्तसमयेऽपि इयं भावना प्रसृताऽऽसीद्यत् - नाट्यशास्त्रस्य भरत आदिप्रणेता अस्ति। आचार्येणाभिनवगुप्तेनास्याः भावनायाः खण्डनं विहितं यत् - नाट्यशास्त्रस्यादिप्रणेता सदाशिवः, पुनश्च ब्रह्मा अन्तिमश्च भरतो मुनिः। भावप्रकाशनमधिकृत्य विद्वांसः कथयन्ति यत् - नाट्यशास्त्रस्य द्वादशसाहस्री संहितायां रचना, आदिभरतेन वृद्धभरतेन वा कृताऽऽसीत्। यस्य कतिपयगद्यांशोऽप्युपलभ्यते। अत्रायं निष्कर्षो, निस्सरति यत् आदिभरतस्य वृद्धभरतस्य वा रचनाः परवर्तिकाले प्रचलिताः आसन्।

नाट्यशास्त्रे नाट्यस्य सहायकत्वानां रूपे - ~~अलङ्कारस्य~~, अलङ्कारस्य, छन्दशास्त्रस्य, सङ्गीतशास्त्रस्यापि विस्तृतं विवेचनं मिलति।

Scanned by CamScanner

येन भरतमुनिः नाट्यविद्याया सदृशम् अलङ्कारशास्त्रस्यापि प्रथमः प्रधानाचार्य आसीदित्येतद् निर्विवादरूपेण सर्वे समालोचकाः स्वीकुर्वन्ति।

कदा चेयं रचना प्रस्तुता मुनिना भरतेन - इत्यपि समालोचकानां कृते गम्भीरो विषयः। यथा नाट्यशास्त्रस्य रचयितुर्भरतमुनेः व्यक्तित्व - कृतित्वविषये विदुषां नैकमत्यमासीत् तथैव रचनाकालविषयेऽपि सैव परम्पराऽऽसीत्। परञ्च देशीय- विदेशीयविदुषामनुसन्धानेनेति सुनिश्चितम् अस्ति यत् नाट्यशास्त्रस्य रचनाकालः सर्वदृष्ट्या ई॰ पू॰ प्रथमशतके विद्यते। परञ्च म॰ म॰ हरप्रसादशास्त्रिणां मते ई॰ पू॰ द्वितीयशतकः। म॰ म॰ पी॰ वी॰ काणे सदृशाः विद्वांसोऽपि विभिन्नैः प्रमाणैः शिलालेखाद्युपस्थापितैः, सेतुबन्ध- विक्रमोर्वशीय- कुट्टनीमत ग्रन्थेषु वर्णितैः तथ्यैः ई॰ पू॰ प्रथमशतकाद् द्वितीयशतकपर्यन्तमेव रचनाकालः सिद्धयन्ति। केचन विदेशीयाः विद्वांसः कीथ- रैप्सनप्रभृतयो नाट्यशास्त्रस्य रचनाकालः तृतीयशतकमामनन्ति।

इत्थं नाट्यशास्त्रस्य रचनाकालविनिश्चये स्व-स्वदृष्ट्या विद्वांसः समर्थयन्ति। अत्रायं निर्गलितः सारांशः ई॰ पू॰ तृतीयशतकात् आरभ्य तृतीयशतकपर्यन्तं महाकविकालिदासवत् - नाट्यशास्त्रस्यापि रचनाकालः लम्बायमानो वर्तते।

२) ग्रन्थकृत्मङ्गलाचरणं व्याख्ययताम्।

उत्तरम्- प्रस्तुतप्रश्नस्योत्तरप्रसङ्गे तत्रादौ मङ्गलाचरणप्रयोजनमाह- चिकीर्षितस्य नाट्यशास्त्र - ग्रन्थस्य निर्विघ्नपरिसमाप्तिकामो भरतमुनिः साम्प्रतं नाट्यशास्त्र-~~प्रवर्तकारौ~~ प्रवक्तारौ देवाधिदेवौ ब्रह्म-महेश्वरावधिकृत्य प्रणतिपूर्वकं मङ्गलमाचरति। यतो हि 'समाप्तिकामो मङ्गलमाचरेदिति शिष्टानुमोदितः पन्थाः। तद्यथा—

'प्रणम्य शिरसा देवौ पितामहमहेश्वरौ।
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम्॥

अन्वयः— पितामह- महेश्वरौ देवौ शिरसा प्रणम्य, ब्रह्मणा यत् उदाहृतं (तत्) नाट्यशास्त्रं (अहं भरतो मुनिः) प्रवक्ष्यामि।

व्याख्याः- पितामह- महेश्वरौ - पितामहश्च महेश्वरश्चेति पितामह-महेश्वरौ (चार्थे द्वन्द्वः), अत्र पितामहशब्देन - पितुः पिता जनकस्य जनकः न ग्राह्यः, यतो हि तदर्थेऽयं शब्दः सुप्रसिद्धः। अत्र तु पितामहशब्देन ब्रह्मणः ग्रहणं भवति, तथा च उक्तममरकोशे- 'ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः' इति। तथैव महेश्वरशब्देन ईशितुं शीलमस्येति ईश्वरः, महांश्चासौ ईश्वरश्चेति महेश्वरः,

महेश्वरशब्देनात्र नृपत्यादीनां ग्रहणं नापितु शिवस्यैव ग्रहणम्। तथा चाह अमरः— 'शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः' इति। महाकविना कालिदासेनापि रघुवंशे उक्तं यत् 'महेश्वरस्त्र्यम्बक एव नापरः' एवं शिव एवेति नात्र सन्देहावसरः। अत्राभिनवगुप्ताचार्याः आहुः— भगवांस्स्वानन्दनिर्भरतया क्रीडाशीलः सन्ध्यादौ नृत्यतीति नाट्ये तदुपस्कारिणि च नृत्ते तदुपजं प्रवृत्तिरिति ताविवात्राधिदैवतं गुरु चेति नमस्कार्यौ—

'विधाता- शिवावेवात्र नमस्कर्तुं योग्यौ'- इति भावः। लक्ष्मीपतेर्विष्णोः कथं नात्र नमस्कार इति जिज्ञासायामाह— 'लक्ष्मीपतिस्तु यद्यपि वृत्तीनां निर्माता तथापि स्वकर्त्तव्यमात्रनिष्ठस्तथाचरन्नसौ पितामहादिवन्नात्र नाट्ये लोकवदुपजीवित इति गुरुत्वाभावान्न नमस्कृतः। अतः पितामह - - महेश्वरौ = ब्रह्माशङ्करौ, देवौ = देवश्च देवश्चेति देवौ। शिरसा = नम्रीभूतमस्तकेन, तथा चाहुः आचार्याः— 'तस्मात् प्रणमनं प्रह्वीभावः कायेन वाचा मनसा च, आद्यः शिरसेति दर्शितः। द्वितीयो देवाविस्यनेन। यतः- प्रणम्यस्य निरुपपदनामग्रहणानौचित्यात्। तेनात्र प्रथमं देवावित्युक्तम्। अभिनेयप्राधान्याच्चाङ्गिकः शिरसेति। वाचिकश्च देवावित्यादिना च वाक्याभिनयो दर्शितः।

पितामह- महेश्वराविति क्रमः छेकानुप्रासव्यञ्जकः'— 'छेको व्यञ्जनसङ्घस्य सकृत्साम्यमनेकधा' इति साहित्यदर्पणलक्षणात् (१०/३)। सालङ्कारस्यात्र वाच्यता च वाक्याभिनयतां दर्शयितुम्। अपि च— सालङ्कारस्य देवतापरितोषहेतुत्वं च दर्शयितुम्। प्रकृते 'पितामह- महेश्वरौ' इत्यनेन देवयोर्लोकहितैषित्वम् उक्तमिति। प्रणम्य = प्रणमनं विधाय, ब्रह्मणा = विधात्रा, ~~यथा पूर्वं~~ उदाहृतम् = यथा निर्दिष्टं प्रतिपादितं। नाट्यशास्त्रं = नाट्यस्य = नटवृत्तस्य, शास्त्रं = शासनोपायमधिकृत्य तं वा, ग्रन्थं = विषयसमूहम्, अत्र — नाट्यवेदः = नाट्यशास्त्रम्, इति पर्यायत्वेन स्वीकृतौ। तत्र नाट्यशास्त्रशब्देन चेदिह ग्रन्थः। तद्ग्रन्थस्येदानीं करणम्। ~~वस्तु प्रवचनम्~~। प्रवक्ष्यामि = प्रकर्षेण कथयिष्यामि = व्याख्यास्ये। नाट्यवेदं लक्षणतो निरूपयिष्यामीत्यर्थः।

अस्मिन् मङ्गलपद्येऽनुष्टुप् नामकं वृत्तमस्ति, ~~तत्~~ तल्लक्षणञ्च यथा-

"श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्,

द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥" इति लक्षणात्॥

Scanned by CamScanner